ॐ श्रीगणेशायनमः॥ अथ अन्योदिलिख्यते॥ तत्रादौ हिरण्यदानम्॥ धातुनां उत्तमं यस्माद्वाटकं सुरवल्लभं समदु
ःखदानेन प्रीयतां रुक्मिणीपतिः॥ १॥ ॐ हिरण्यायनमः इदं हिरण्यं ददाति इदं स्वेति प्रतिवचनम् ततो द्विजकरे जलं दद्यात
ॐ तत्सद्याद्य अमुकमासे अमुकपक्षे अमुकवासरान्वितायां अमुकतिथौ अमुकगोत्रस्यामुकशर्म्मणो यमसमागमभयपी
डानिवारणार्थं विष्णुलोकप्राप्तिकाम इदं हिरण्यं अग्निदैवतं यथानामगोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे [illegible]
ष्ठा ॐ अद्य कृतैतद्धिरण्यदानप्रतिष्ठार्थं हिरण्यमौलिकद्रव्यं हिरण्यं वा अग्निदैवतं यथानामगोत्राय ब्राह्मणाय
दक्षिणामहं संप्रददे अथ रौप्यदानं शिवनेत्रोद्भवो यस्माद्रौप्यं पितृणां प्रियं तस्माद्रौप्यप्रदाने [illegible] प्रीयतां मे स्वामि
पतिः १ ॐ रजतायनमः ॐ ब्राह्मणायनमः ॐ इदं रजतं ददाति इदं स्वेति प्रतिवचनं ततो द्विजकरे जलं दद्यात

ॐ
प्रे०मं०
२

य निवारणार्थं स्नानं दिलाता नु कृष्णपदेवताना श्रीविष्णुलोकप्राप्तिकामोऽमुकशर्मब्राह्मणाय तुभ्यमहं सं० ॐ अद्येह
ते तत्र तिलदानप्रतिष्ठार्थं अग्निदेवतं यथा० अथ सप्तधान्यदानं यव १ गोधूम २ धान्य ३ तिल ४ कंगु ५ श्यामाक ६
चिनक ७ अश्वमेधादि यज्ञस्य फलं प्राप्नोति मानवः सप्तधान्यप्रदानेन यमो मे प्रीयतामिति ॐ अद्यामुकोऽहं यमदूत
भयनिवारणार्थं इदं सप्तधान्यं प्रजापतिदेवतं यथानाम्ना ब्राह्मण तुभ्यमहं संप्रददे ॐ अद्य कृतैतत्सप्तधान्यप्रतिष्ठार्थं
हिरण्यनिष्क्रयीभूतं ताम्रं अग्निदेवतं यथा० अथ लवणदानम् यस्माद्रसाः सर्वे नोत्कृष्टा लवणं विना विष्णोः प्रीति
करं नित्यमतः शान्तिं प्रयच्छ मे ॐ अद्यामुकशर्मणो यमदूतभयादिनिवारणार्थं लवणं विष्णुदेवतं यथानामगोत्रा
य ब्राह्मणाय तुभ्यमहं संप्रददे अद्य कृतैतत् लवणदानप्रतिष्ठा० अथ वस्त्रदानम् शीतवातोष्णसंत्राणं ल
ज्जाया वारणं परं तस्माद्वस्त्रप्रदानेन पीतवासाः प्रसीदतु १ अद्येह० अमुकशर्मणो यममार्गे भय शीतवातोष्णादि
निवारणार्थं श्रीविष्णुप्रीतिकाम इदं वस्त्रं बृहस्पतिदैवतं यथा० अद्य कृतैतत् वस्त्रदानप्रतिष्ठार्थं० अथ खड्
गादि लोहदानम् दानप्रसभा कुठारो मुसलो दण्डः खड्गश्च छुरिका तथा तस्माल्लोहप्रदानेन यमो मे प्रीयता
मिति अद्येहामुकशर्मणो यममार्गे क्षुधादिभयनिवारणार्थं इमं लोहं यमदेवतं यथा० अद्य कृतैतत् खड्गा
दिलोहदानप्रतिष्ठार्थं० अथ कर्पासदानं शीतवातोष्णसंत्राणं लज्जारक्षणं तथा परः तस्मात्कर्पासदानेन वासु
देवः प्रसीदतु १ अद्येहेत्यादि अमुकशर्मणो शीतवातोष्ण यमादिभयनिवारणार्थं इमं कर्पासं बृहस्पतिदैवतं य०
अद्य कृतैतत् कर्पासदानप्रतिष्ठार्थं हिरण्यप्रतिनिधिभूतं ताम्रं अग्निदेवतं यथा अथ भूमिदानं आधारः सर्वभू
तानां वराहेण यदा भस्यान्तरसातले तस्माद्भूमिप्रदानेन वासुदेवः प्रसीदतु अद्येहेत्यादि अमुकशर्मणो २

ॐ श्रीगणेशाय नमः ॥ अथ अन्त्येष्टि लिख्यते ॥ तत्रादौ हिरण्यदानम् ॥ धातूनामुत्तमं यस्माद्धाटकं सुरवल्लभं म
मदेयप्रदानेन प्रीयतां रुक्मिणीपतिः ॥१॥ ॐ हिरण्याय नमः इदं हिरण्यं ददाति ददस्वेति प्रतिवचनम् ततो द्विजकरे
जलं दद्यात् ॐ तत्सद्यामुक मासे अमुक पक्षे अमुक वासरान्वितायां अमुक तिथौ अमुक गोत्रस्यामुक शर्मणा
यममार्गे भयपीडानिवारणार्थं विष्णुलोकप्राप्तिकाम इदं हिरण्यं अग्निदैवतं यथानाम गोत्राय ब्राह्मणाय तुभ्यमहं
हं संप्रददे दानप्रतिष्ठा ॐ अद्य कृतैतद्धिरण्यदानप्रतिष्ठार्थं हिरण्यमौल्यकद्रव्यं हिरण्यं वा अग्निदैवतं यथानाम
गोत्राय ब्राह्मणाय दक्षिणामहं संप्रददे अथ रौप्यदानं शिवनेत्रोद्भवं रौप्यं यस्माद्रौप्यं पितृणां प्रियं तस्माद्रौप्यप्रदा
नेन प्रीयतां रुक्मिणीपतिः १ ॐ रजताय नमः ३ ॐ ब्राह्मणाय नमः ॐ इदं रजतं ददाति ददस्वेति प्रतिवचनं ततो द्वि
जकरे जलं दद्यात् ॐ तत्सद्या॰ यममार्गभयपीडानिवारणार्थं विष्णुलोकप्राप्ति काम इदं रजतं चंद्रदैवतं अमुकगोत्राय
अ॰ श॰ ब्राह्मणाय तुभ्यमहं संप्रददे दानप्रतिष्ठा ॐ अद्य कृतैतद्रजतदानप्रतिष्ठार्थं इदं रजतं रजतमौल्यकद्रव्यं
वा चंद्रदैवतं अ॰ ब्राह्मणाय तुभ्यमहं संप्रददे अथ घृतदानं ॐ आज्यं तेजः समुद्दिष्टमाज्यं पापहरं परं आज्यं सु
राणामाहार आज्ये लोकाः प्रतिष्ठिताः तस्मादाज्यप्रदानेन घृतार्चिः प्रीयतामिति ॐ अद्यामुकगो॰ यमहतभय
निवारणार्थं श्रीविष्णुघृतार्चिःप्रसन्नकाम इदं घृतं अग्निदैवतं यथानाम॰ ब्राह्मणाय तुभ्यमहं संप्रददे दानप्र
तिष्ठा अद्य कृतैतद्घृतार्चिःप्रतिष्ठार्थं हिरण्यनिष्क्रयं तन्मात्रमग्निदैवतं य॰ अथ तिलदानं तिलाः कश्य
पसंभूता तिलाः पापप्रणाशनाः तस्मात्तिलप्रदानेन विश्वेदेवाः प्रसीदन्तु १ ॐ अद्यामुकशर्मणा यमहतभ

यमुल्लोकनिरसनपूर्वकं इमां भूमिं विष्णुदैवतं यथानामगोत्राय तुभ्यमहं संप्रददे दानप्रतिष्ठा अद्य कृतैतद्भूमिदानप्रति
ष्ठार्थं हिरण्यानक्षत्रां इदं सतते चंद्रदैवतं यथा० अथ मोक्षधेनुदानम् ५ तत्र मोक्षधेनुप्रार्थयेत् मोक्षदो हि हृषीकेश
मोक्षदो हि जनार्दन मोक्षधेनुप्रदानेन मुकुंदः प्रीयतां मम: १ मोक्षदो वासुदेवश्च सर्वशास्त्रेषु पठ्यते सर्वदुःखापदाना
र्थं मोक्षधेनुं ददाम्यहं २ ॐ अद्येह अमुकमासे अमुकपक्षे अमुकतिथौ अमुकगोत्रोत्पन्नोऽमुकशर्माणोऽहं मम ज
न्मसप्तजन्मोपार्जितपापक्षयपूर्वकसर्वारिष्टशांतिकाम इमां गां सवत्सां सालंकारां रुद्रदैवतां अमुकगोत्राय ब्राह्म
णाय दातुमहमुत्सृजे स्वस्ति ब्राह्मणो ब्रूयात् दानप्रतिष्ठा० ॐ अद्य कृतैतन्मोक्षधेनुदानप्रतिष्ठार्थं हिरण्यमि
श्रुतो इमां ताम्रं अग्निदैवतं यथानामगोत्राय० अथ ऋणधेनुःप्रार्थना० ऐहिकामुष्मिकं चैव सप्तजन्मार्जि
तमृणं तत्सर्वं नाशमायातु गामेतां ददतो मम १ जन्मयोपार्जितं पूर्वं ऋणरूपेण संचितं ज्ञाताज्ञातप्रणाशा
र्थं ऋणधेनुं ददाम्यहं २ ॐ अद्येत्यादि अमुकशर्मणो मम सप्तजन्मोपार्जितज्ञाताज्ञातऋणसंचयप्रशमनार्थमि
मां गां सवत्सां रुद्रदैवतां ऋणधेनुं दातुमहमुत्सृजे दानप्रतिष्ठा अद्य कृतैतदृणधेनुदानप्रतिष्ठार्थं हिरण्यप्र
तिनिधीदं ताम्रमग्निदैवतं यथा० पापधेनुःप्रार्थना सप्तजन्मार्जितं यच्च पापरूपं च संचितं तस्योपशमनार्था
य पापधेनुं ददाम्यहं १ अद्यामुकशर्मणोऽहं मम सप्तजन्मोपार्जितज्ञाताज्ञातमनोवाक्कायकृतपातकोपपातकक्ष
यार्थं इमां गां सवत्सां प्रत्यक्षनिरुद्रदैवतां पापधेनुं अमुकगोत्राय ब्राह्मणाय० दानप्रतिष्ठा ॐ अद्य कृतैत
त्पापधेनुदानप्रतिष्ठार्थं हिरण्यप्रतिनिधी ताम्रमग्निदैवतं ब्राह्मणाय दातुं० प्रायश्चित्तधेनुःप्रार्थना यन्मया

ॐ
प्रे॰ सं॰
२

उत्क्रान्तं देवसप्रज्ञमनुपार्जितं मनोवाक्कायकं वापि क्षमयस्व जनार्दन १ त्रिविधं पातकं लोके त्रिविधेनै
व कर्मणा सञ्चितं तद्विनाशाय प्रायश्चित्तं ददाम्यहं २ अद्येह अमुकशर्म्मणो मम प्रज्ञाज्ञानोपार्जित मनो
वाक्काय त्रिविधपापप्रशमनाय इमां गां सवत्सां क्षीरिणीं रुद्रदैवतां प्रायश्चित्तधेनुं अमुकगोत्राय अ
मुकशर्म्मणे ब्राह्मणाय दातुमहमुत्सृजे दानप्रतिष्ठा ॐ अद्य कृतैतत्प्रायश्चित्तधेनुः दानप्रतिष्ठार्थं हि
रण्यप्रतिनिधीतामं अग्निदैवतं यथा अथ वैतरणी प्रार्थना कृष्णां वैतरणीं धेनुं यः प्रदद्याद्द्विजातये
सर्वपापविनिर्मुक्तो वैतरणीं तरते तु सः १ उष्णे वर्षति शीते वा वातिपाते दारुणे दातारं त्रायते यस्मात्तस्माद्वैतर
णीतु सा २ यमद्वारे महाघोरे कृष्णा वैतरणी नदी तां तर्तुकामो दास्यामि कृष्णां वैतरणीं च गां ३ ॐ अद्येह अमु
कमासे अमुकपक्षे अमुकतिथौ अमुकगोत्राय अमुकशर्म्मणोहं सर्वद्वयपूर्वकं यमद्वारोत्स्थितप्राप्ति
गून्तर्तुं वैतरणीरूपां अमुकगोत्राय अमुकशर्म्मणे ब्राह्मणाय तुभ्यमहं मुत्सृजे। दानप्रतिष्ठा ॐ अद्य कृता
नवैतरणीदानप्रतिष्ठार्थं हिरण्यनिष्क्रीतं ताम्रमग्निदैवतं यथानाम गोत्राय ददे। प्रार्थना यस्त्वासिमया
दैवितस्ते वैतरणी नदी तावत्कालं प्रतिरक्ष यावद्गमनं ममः इति पठेन ब्राह्मणस्य पदाभिवन्दनेन नमस्का
गोमयापलिप्तमण्डले तिलकुशानास्तीर्य तत्र स्नापितं पितृमातृ स्थाप्य उत्तरशिरस्कं दक्षिणाभिमुखं च स्था
पयेत् तस्य कंठे शालिग्रामशिलां निधाय आतुरस्य हस्ते हृदये कुशान्दत्वा तस्योपरि कुशतिलान्निक्षि
पेत् पंचरत्नमंत्र स्वर्णाधर्माय स्वाहा इति मंत्रेण संपूज्य गंधपुष्पाक्षतैः पंचरत्नमुखे दद्यात् गंगोद २

कंचस्मेर्दकंतुलसीपत्रंमुखेदद्यात् स्वर्णस्य नवशलाका शलाकाएकं१मुखेदद्यात् शलाका२नेत्रयोःततःश
लाका२कर्णयोःपुनःशलाका२कर्णयोःपुनःशलाका२नासिकयोःततःशलाका१लिंगेततःशलाका१गुदे
दद्यात् स्वर्णरजितं नीलप्रवालमौक्तिकंतथा पंचरत्नंमुखेयस्य यमस्य किंकरिष्यति १ तुलसीमालांतस्य कंठे
देया धात्रीफलमुखेदेया गोपिचन्दमुक्तोपिनरः सद्गतिमाप्नुयात् नारायणस्मरणं कार्यं नमोनारायणाय च
मोक्षंदेहिजगन्नाथ मोक्षंदेहिजनार्दन मोक्षंदेहिहृषिकेश मोक्षंदेहिजगत्पते १ ओमित्येकाक्षरंब्रह्मव्याहरन्
मामनुस्मरन् यःप्रयातित्यजन्देहंसयातिपरमांगतिं अच्युतंकेशवंरामनारायणंकृष्णदामोदरंवासुदेवंहरिंश्री
धरंमाधवंगोपिकावल्लभंजानकीनायकंरामचंद्रंभजे १ कमलनयनवासुदेवविष्णोधरणिधराच्युतशंखचक्रपा
णेभवशरणमितीरयंतियेवैत्यजभटदूरतरेणतानपापान् २ तानानयध्वमसतोविमुखान्मुकुंदपादारविंदमकरंद
हंस रसादजस्रम् निष्किंचनैःपरमहंसकुलैरसंगैर्जुष्टाद्गृहेनिरयवर्त्मनिबद्धतृष्णान् ३ जिह्वानवक्तिभगवद्गुण
नामधेयं चेतश्चनस्मरतितच्चरणारविंदम् कृष्णायनोनमतियच्छिरएकदापि तानानयध्वमसतोऽकृतविष्णु
कृत्यान् ४ अथदीपदानमंत्रः यमद्वारेमहाघोरे अंधेतमसिदारुणे तत्रयांतितितकामेनदीपायंदीयतेमया १
यमलोकेनिरालंबेनसूर्योनापिचंद्रमाः तमंहंतुमिच्छामिदीपंदद्याज्जनार्दनः २ यत्रनमातानपितानबंधुर्भ्रा
तापिवायत्रसहज्जनाश्च नज्ञायतेयत्रदिवानरात्रिस्तत्रप्रदीपंशरणंप्रपद्ये ३ इतिदीपंविष्णुमंत्रेदद्यात् उ
त्तरेणामसव्यंकृत्वादीपंदेयं ॐअद्येह अमुकमासे अमुकपक्षे अमुकतिथौ अमुकगोत्रस्य अमुकप्रेतस्ययम
मार्गांधकारनिवारणार्थं आद्यादिदशाहपर्यंतमखंडदीपदानमहंकरिष्ये अयंकृत्वाततःदशखंडदीप

प्रे॰मं॰ ३

दानप्रतिष्ठार्थं नाममंत्रि दैवतयथा॰ अथ धर्मघटसंकल्पः ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य पितृदेहांतरयुत
सुतृप्तिप्रीत्यर्थं अद्यदिनमारभ्य दशाहपर्यंतं आकाशाधिकरणकधर्मघटदानमहं करिष्ये ततो मृण्मयपात्रे शीत
लोदकपूरितं किंचिद्दुग्धं निक्षिप्य गंधपुष्पादिभिः संपूज्य परिवस्त्र दद्यात् मंत्रवाक्यं च आकाशे प्रेततृप्त्यर्थं तस्मा
दाकाशगामिने गृहस्य दक्षिणभागे प्रेततृप्तिप्रदो भव १ अथ पूर्वोक्त नववस्त्रे पवित्र दीर्घं स्नान वस्त्रवेष्टितस्य नां ४
रज्जुपरिस्थापितस्य करचरणादिनाहत हृदबंधनस्य पुत्रादयः श्मशानं नयेयुः अथ मृत्युस्थानाद्यारभ्य चिताप
र्यंत पंचपिण्डविधान यथादिपिंडाने तत्र प्रथमस्थाने मृत्युस्थाने तथा द्वारे विश्रामे पितृ चिता पिंडश्च
तथाः कुक्षि पिण्ड पंचमः अथ स्थानपिण्डदानक्रमः ॐ अद्येहामुकगोत्रस्यामुकप्रेतस्य स्थाने पिंडप्र
दानं करिष्ये अद्येहामुकगोत्रस्यामुकप्रेतस्य पिंडासनं ते वोपतिष्ठतां अद्येहामुकगोत्रस्यामुकप्रेतस्यावने
जनं ते वोपतिष्ठतां अद्येहामुकगोत्रस्य अमुकप्रेतस्यायं पिंडो मद्दत्तस्ते वोपतिष्ठतां अद्येहामुकगोत्रस्या
मुकप्रेतस्य प्रत्यवनेजनं ते वोपतिष्ठतां अथ यमसूक्तः ॐ अपरेहरायमानो गामस्वं पुरुषं पशुं वैवस्वतो न तृप्य
ति सुरयाईव दुर्मतिः ॐ अपेतु मृत्युरमृतं न आगाद्वैवस्वतो नो अभयं कृणोतु इत्यादि यमसूक्तं पठन् ततो द्वा
महारपिण्डं दद्यात् अद्येहामुकगोत्रस्यामुकप्रेतस्य द्वारपिंडप्रदानमहं करिष्ये अद्येहामुकगोत्रस्या
मुकप्रेतस्य पिंडासनं ते वोपतिष्ठतां अद्येहामुक गो॰ अ॰ प्रेत अवनेजनं ते॰ अद्येहामुकगोत्र अ॰ एष द्वा
रपिंडः मद्दत्तः अद्येहामुकगोत्र अमुकप्रेत प्रत्यवनेजनं ते॰ द्वारि तिष्ठन्ति ये दूताः स्तोमुञ्जरपाणयः तेभ्यः
पिंड मया दत्तः स्तेभ्यश्च वमुपतिष्ठतु १ अथ पथि विश्रामपिण्डं दद्यात् अद्येहामुकगोत्रस्यामुकप्रेतस्य पथि ३

विश्रामपिंडदानमहं करिष्ये अद्येह अमुकगोत्रस्य अमुकप्रेतपिंडसूनंत· अद्येह अमुकगोत्र अमुकप्रेत अवने
जनत· अद्येह अमुकगोत्र अमुकप्रेत एष विश्रामपिंडमस्तु स्त· अद्येह अमुकगोत्र अमुकप्रेत अत्र वनेजनं ते वो
भूतप्रेत पिशाचादिधर्ममार्गे चमिश्रोता विश्रामपिंडदानेन हि तेनाक्षय्यमुपतिष्ठतु १ चितासमीपे शवं च संस्थाप्य
अथ यदि किंचित्पुत्रादि रजत ताम्र द्रव्यं प्रायश्चित्तं कुर्यात् संकल्प अद्येह इत्यादि देशकालौ संकीर्त्य अमुकगोत्र
नामुक शर्म्माहं पित्रादि मरणसमये दोहिश्राद्धे पापपरीहारार्थं श्रीवासुदेवप्रीतये कृच्छ्रादि प्रायश्चित्तं
कृत्वा तन्नाम्न्या भूतं गवादि द्रव्यं सुवर्णं ब्राह्मणाय दास्ये मृतकाने वा दद्यात् कर्मकर्त्ता पुत्रादि अधिकार प्राप्त्यर्थं
किंचित्प्रायश्चित्तं अत्यान्त्रावीभूतं गवादि द्रव्यं ब्राह्मणाय दास्ये क्रियां तु कुरुते यस्तु नरः तस्य मुंडनं शेष पुत्र
दशाहेन केशश्मश्रु नखानि च १ मातापित्रो मृतावपि पवनेन नः हन्तं सुतेः पतंति नरके घोरे यावदिंद्राश्चतुर्दश २
उदकं पिंडदानं च पवनेन कृतं सुतेः नोपतिष्ठंति तत्सर्वं दःतंतोयतिलादिकं ३ तस्मात्सर्वप्रयत्नेन नरैर्न मुंडनं शि
रः पुत्र पत्नी तथा भ्राता दौहित्रः पौत्रकस्तथा ४ यः करोत्यग्नि दाहिक्यं सोपि तच्चैव मुंडयेत स्मृतिः स्यानेन ति
मुंडन पहले करे लेकर फेरखो नकरा सान नकरके पिंडदानादि सम कर्म्म करे चिताभूमौ संशोध्य गोमयोदकेनाभ्यु
क्ष्य तील कुशानास्तीर्य तदुपरि कोष्टं निर्माय तत्र चंदनं निक्षिप्य तदुपरि पुनः कुशातिलनास्तीर्य तत्र तिर्याद
केन शवं पुनः संस्नाप्य तत्र जले तीर्थान्यावाह्य गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः कुरुक्षे
त्रं च गंगा सर्वपापप्रणाशनि अवंतिका काशि सरयू गंडकी नर्मदा तथा वेणा वेत्रवती च वराहं च तीर्थं पिंडारकं तथा
पृथिव्यां यानि तीर्थानि चतुःसागरकस्तथा एतानि मनसा ध्यायन् जले सर्वतीर्थान्यावाह्य तुलसीतिलगं

ॐ
प्रे॰सं॰
४

गोदकं निक्षिप्य तेन जलेन शवं च संस्नाप्य भाले गोपीचंदनं कृत्वा तुलसीमालां दत्वा तत्र चितोपरि शवं संस्था
प्य चितापिंडं दद्यात् तद्यथा अद्येह अमुकगोत्रस्यामुकप्रेतस्य चितापिंडप्रदानमहं करिष्ये अद्येह अमुक
गोत्रस्यामुकप्रेतस्य पिंडास्तरणं ते वोपतिष्ठतां अद्येह अमुकगोत्रस्यामुकप्रेतस्य अवनेजनं ते॰ पिंडं गृहीत्वा॰
अद्येहामुकगोत्रस्यामुकप्रेतस्य चितापिंडमद्दत्तस्ते॰ अद्येह अमुकगोत्रस्यामुकप्रेतस्य प्रत्यवनेजनं ते॰ ये चास्मिन्
पिशाचाद्या भूता विगतयोनयः चितापिंडः प्रदत्तोऽहि तृप्यामवोपतिष्ठतु ततः कुक्षिपिण्डः अद्येह अमुकगोत्रस्याम
कप्रेतस्य कुक्षिपिण्डप्रदानमहं करिष्ये अद्येहामुकगोत्रस्यामुकप्रेतस्य पिंडास्तरणं ते वो॰ अद्येहामुकगोत्रस्यामुक
प्रेतस्य अवनेजनं ते वोपतिष्ठतां पिंडं गृहीत्वा॰ अद्येहामुकगोत्रस्यामुकप्रेतस्य कुक्षिपिंडो मद्दत्तस्ते॰ अद्येह अमु
कगोत्रस्यामुकप्रेतस्य प्रत्यवनेजनं ते॰ तिष्ठति सर्वपापानि शरीरे चास्य देहिनः कुक्षिपिण्डः प्रदत्तोऽहि तृप्यामवोपति
ष्ठतु ततः चितायां पाषाणोपरि अग्निं संस्थाप्य तन्नो अग्ने इह आगच्छ इह तिष्ठतः अग्निं संपूज्य गंधाक्षतपुष्पैः
ततोऽग्नेः प्रार्थनं कृत्वा मंत्रेणानेन निश्चित स्वाहा केश च निर्विघ्न सप्त जिह्वा कृशानुः सत्वमार्गप्रदानेन युष्मा
पतुरनीतकं इत्यग्निं प्रार्थ्य संस्कृत्य प्रतिष्ठाप्य संपूज्य ततोऽग्नौ जुहुयात् अथ मंत्रः ॐ अग्नितेजाधिपतये
स्वाहा १ ॐ विश्वसत्वाधिपतये स्वाहा २ ॐ कालाय धर्माधिपतये स्वाहा ३ ॐ पृथिव्ये लोकाधिपतये स्वा॰ ४
ॐ मद्भ्यो रसाधिपतिभ्यः स्वाहा ५ ॐ वायवे बलाधिपतये स्वाहा ६ ॐ आकाशाय सर्वाधिपतये स्वाहा ७
ॐ कालाय धर्माधिपतये स्वाहा ८ ॐ मद्भ्यः सर्वसाक्षिणीभ्यः स्वाहा ९ ॐ ब्रह्मणे वेदाधिपतये स्वाहा
१० ॐ रुद्राय ईशानाधिपतये स्वाहा ११ इत्येकादशाहुतिर्हुत्वा प्रथमं गंधाक्षतपुष्पैः क्रव्यादमग्निं प्राणाय

संपूज्य प्रार्थना० त्वं भूतकृज्जगद्योनिस्त्वं लोकपरिपालकः उपसंहारकस्तस्मादेनं स्वर्गं नय इति कृत्वा समभ्यर्च्य
शरीराहुतिमाचरेत् अस्मात्त्वमधिजातोसि त्वदयं जायतां पुनः असौ स्वर्गाय लोकाय स्वाहा ज्वलतु पावक अथ पंचाहु
त्याहुति० असौ स्वर्गाय लोकाय स्वाहा १ यमाय स्वाहा २ अंतकाय स्वाहा ३ मृत्यवे० ४ ब्रह्मणे० ५ कालेकामभार
वेभ्यः० ६ द्यावाभूमिभ्यां० ७ अर्द्धदग्धे तथा देहे दद्यादाज्याहुतीस्ततः ततोन्या घृताहुतिः ब्रह्महत्याय स्वाहा १
विश्वेभ्यो देवेभ्यः० २ द्यावापृथिवीभ्यां स्वाहा ३ अथ लक्षमंत्रः पूर्वोक्ततीर्थानि ध्यात्वा देवस्याग्नेर्मुखे सर्वे हुत
स्नानं गता यूयं दहन्तु चास्य गात्राणि दहन्तु गतिमुत्तमं १ अग्निदानं पुत्रादिकोऽपसव्यं कृत्वा होमाग्निं सव्यधुल्मुकं
गृहीत्वा इमं मंत्रं पठेत् कृत्वा तु दुष्कृतं कर्म जानता वापि जानता मृत्युकालवशं प्राप्तं नरं पंचत्वमाग
तं १ धर्माधर्मसमायुक्तं लोभमोहसमावृतं दहेयं सर्वगात्राणि दिव्याल्लोकान् स गच्छतु २ इति० एवमुक्त्वा तु
तं शीघ्रं कृत्वा चैव प्रदक्षिणां ज्वल्यमानं तथा वह्निं यथास्थानं प्रदापयेत् इति वाक्यमंत्रं शीघ्रमुच्चार्य त्रिप्रदक्षि
णं चितायां कृत्वा होमाग्निं सव्यधुल्मुकं पुरुषस्य शिरःप्रदेशे दानं स्त्रीयाः पादप्रदेशात्तु कुर्यात् दह्यमानशवस्य कपाल
छेदनं हननं न कर्तव्यं कुतः यतो दुःखमश्नुते इति वचनात् ततः अगरुचंदनादि हुते चिताग्निं पश्यन् शवदाहकपो
तावशेषयेत् ततः प्रादेशमात्रसप्तकाष्ठिकाः खड्गकुठारप्रहारेण सपुष्पचंदनाक्षतयुताः कृत्वा क्रव्यादाय न
मस्तुभ्यमिति मंत्रेण काष्ठिकासप्तकमेकैकं अग्नौ क्षिपेत् ततः कपोतावशेषं ज्ञात्वा निष्काश्य प्रक्षाल्य वस्त्रे
णावच्छाद्य अगाधजले निक्षिपेत् ततो अस्थिसंचयनश्राद्धं कुर्यात् अपरेद्युस्तृतीये वा दाहानंतरं एव वा तत्रा
स्थिसंचयननिमित्तं श्राद्धं कुर्यात् अद्येह अमुकगोत्रस्य अमुकप्रेतस्य अस्थिसंचयनाधिकारसिद्ध्यर्थं अस्थि

संचयनं करिष्ये अद्येहामुकगोत्र अमुकप्रेत आसनं तवोपतिष्ठतां अद्येह अमुकगोत्र अमुकप्रेत अवनेजनं तेउं॰
अद्येहामुकगोत्रामुकप्रेतस्यास्थिसंचयनश्राद्धे एष आमपिंडो मद्दत्तस्तव॰ अद्येहामुकगोत्र अमुकप्रेत अव
नेजनं तव॰ गंधाक्षतपुष्पधूपदीपादि दत्वा विसर्जयित्वा गंधाद्युपस्करणं गृहीत्वा क्रव्यादमुखेभ्यो देवेभ्यो
नमः इत्यर्घं दत्वा स्मशाने जपेत् येस्मिन्स्मशाने देवाः सुभवंत अत्र सनातनाः तेस्मत्सकाशाद्गृह्णंतु वलिमष्टांगम
क्षयं प्रेतस्यास्य शुभांल्लोकान्प्रयच्छंतु पिशाचास्तताः अस्माकमायुरारोग्यं सुखं च ददतां क्षयं अथ अष्टांग॰
भक्ष्य १ भोज्य २ पानक ३ पायस ४ मकमंगा फलमूल हितियाग २ अर्घ १ ३ गंध च ४ पुष्पमाला ५ धूप ६ दीप॰
स॰ ७ तांबूलादिपुरोपात्र अ॰ ८ अष्टांगवलिमुच्यते इति वचनात् अन्नमये इति स्मशानवासिभ्यो वलिं दत्वा
विसर्जयेत् ततोऽपसव्येन गव्येन पयसा अस्थीनि संचयेत् मौनेन शमीपलाशशाखाभ्यां अंगुष्ठकनिष्ठि
काभ्यामुद्धृत्य दक्षिणोत्तरायतान्कुशानास्तीर्य तदुपरि हरिद्रापीतवस्त्रखंडं संस्थाप्य अस्थीनि निसिंचयेत् गवां
गंधवारिणा प्रसिंच्य सर्वौषधीमिश्रितानि कृत्वा मंत्रेण कुंभेषु निक्षिपेत् मंत्रः ॐ वाचा मनसा आर्वत्तेन त्व
प्याविषयापृथिव्यामसंतारमेन निर्वयात्यता इति मंत्रेण निधाय पुत्तलिकां कृत्वा कुंभेन निधाय तं कुंभं अश्वत्थ
वृक्षमूले खात्वा धारयेत् ततो भस्मागारादि सर्वं नीयं निक्षिपेत् ततश्चितास्थले वहदकेन संशोध्य गोमयेनोपलि
प्य तत्र दीपं प्रज्वाल्य पूर्वोक्तप्रकारेण चितोपशमनश्राद्धं कृत्वा अद्येहामुकगोत्रस्यामुकप्रेतस्य चितोपशमन
श्राद्धं करिष्ये अद्येह॰ अ॰ गो॰ अ॰ प्र॰ आसनं मद्दत्तं॰ अद्येहामुकगोत्रस्यामुकप्रेतस्य अवनेजनं तव॰
अद्येह अमुकगोत्रस्यामुकप्रेत चितोपशमनपिंड मद्दत्तस्तवोपतिष्ठतां अद्येहामुकगोत्र अमुकप्रेत अवनेजनं

अथैवं बलिं सम्यक् पूर्ववद्दत्त्वा विसर्जयेत् अनादिनिधनो देव इति पठेत् अथ प्रसंगादस्थिप्रक्षेपप्रकारो ऽभिधीयते फलातिश
यश्रवणात् यथा दशाहाभ्यंतरे तत्स्थानाच्छनकैर्नीत्वा कदाचिज्जाह्नवीजले कश्चित् क्षिपति मत्पुत्रो दौहित्रो वा सहोद
रः १ मातृकुले वा पितृस्यास्यान्या कन्यकुले नराः गंगातोये ध्रुवं स्यादस्थि क्षिप्यंते शुभकर्मणा तत्स्या पुनरावृत्तिर्ब्रह्मलो
कात्सनातनात् २ प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सह चतुर्थे ब्राह्मणानां तु पंच
मेऽह्नि भूभुजां नवमे वैश्यजातीनां शूद्राणां दशमेऽहनि २ अत ऊर्ध्वं गते शुक्रे तथा मासे मलिम्लुचे गंगायामस्थिनिःक्षे
पः न कुर्यादिति गौतमः १ अथ दशाहाभ्यंतरे न दशाहः अस्त्वादि दशाभ्यंतरे यस्य गंगातोयेऽस्थि मज्जति गंगायां
मरणे यादृक् तादृशं फलमाप्नुयात् इति अस्थिक्षेपो गंगायामस्थि भवति तथा यत्नेन असंभवकालांतरेऽपि पुत्रादि
गंगां गत्वा स्नात्वा पंचगव्येन अस्थीनि सिंच्य हिरण्यमध्वाज्यतिलमिश्रितानि कृत्वा मृत्पिंडसंपुटे निधाय
दक्षिणां दिशं पश्यन् नमोऽस्तु धर्माय इति जलं प्रविश्य स हि मे प्रीतो भवतु इति गंगांभसि तानि क्षिपेत् ततो जलादु
त्तीर्य सूर्यं दृष्ट्वा विप्रेभ्यो दक्षिणां दत्त्वा तस्य फलं गंगातोये तु यस्यास्थि प्लवते शुभकर्मणः न तस्य पुनरावृत्ति
र्ब्रह्मलोकात्कथंचनेति यमवचनं ततोऽन्यत्र जलाशयं गत्वा कौचित् येनेन संबंधेन संबंधे स्यालवा उदकं करिष्याम
इत्युदकं याचेरन् ततः संबंधिस्यालो वा ब्रूयात् मा चैवं पुनरात्यशतं वर्षं चैतो कुरुध्वमिति शताद्वे वा ततः एकवस्त्रा
प्राचीनावीतिनो मुक्तशिखाः ब्राह्मणा दक्षिणामुखा क्षत्रिया उदङ्मुखा वैश्याः प्राङ्मुखा शूद्रः प्रत्यङ्मुखा सर्वेस्त्र
तिनो वामकरस्यानामिकया अपनः शोशुचदघमिति उदकं मथनोद्यात् आदक्षिणायनावर्त्यं हृद एवं सकृन्निम
ज्य शिखां बध्वा सव्येनाचम्य अपसव्येन अद्येह अमुकगोत्रामुकप्रेत उदकांजलिं मया दत्तस्तवोपतिष्ठतां

ॐ०
प्रे.मं.
६

एवमेकवारं वा दत्त्वा सचैलेन पुनः स्नात्वा उत्तीर्य्य हरितशाड्वलप्रदेशोपस्थितान् संसारानित्यतां पादकैरितिहासपुराणा
दिभिः अनित्यागस्मिन्नारा धर्म्मैसंसारे धर्ममेवाचरध्वं यो वः सह गन्ता मास्तु वः सारबुद्धिर्य्यद्बुद्धिर्वा महीधरा नामि
न्द्रादिदेवानामप्यवश्यं भाविविनाशं पुराणादिप्रसिद्धं कुर्य्यन्नजानीत किंवा तौनानपि पाण्डवान् कृष्णेन तत्तद्वस्य संसार
स्यासारता शुनिनिश्चित्य मा शोचं कुरुत श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते ततो वशः अतो न रोदितव्यं हि क्रियाः कार्य्याः स्वशक्तितः
बांधवैर्मुक्तं श्लेष्माश्रु पतनं प्रेतेन भुज्यते अतो न रोदितव्यं स्वशक्तितः क्रिया कार्य्या इत्याद्विशोकापनोदकं कुर्य्युः
मानुषे कदलीस्तंभे निःसारे सारमार्गणं करोति यः सम्मूढो जलबुद्बुदसन्निभे इत्यादिवाक्यैर्विशोकाः कुर्य्युः
ततः कनिष्ठपुरस्सरं पश्चादनवलोकयतः पंक्तिभूताः संतो गृहमागच्छेयुः दिवा चेद्दाहो भवेत् नक्षत्रदर्शनात् रात्रौ
चेदादित्यदर्शनपर्य्यंतं ग्रामं न विशंति अथवा ब्राह्मणानुज्ञया तद्वशा विशंति ततो नियता द्वारि निंबपत्रा
णि विदश्य आचम्य उदकमग्निं गोमयं गौरसर्षपान् दूर्वांकुरान् तैलं वृषं वालभ्य श्मशानमार्गमाक्रम्य प्रविशेयुः स
ततस्त्रिपक्षं दशमादि प्रेतस्पर्शिनां सर्वेषां भवति पुत्राद्यस्तद्दिनं उपवासं कुर्य्युः बालवृद्धावयस्तु यथाशक्ति
एकभक्तं वा पिंडं दत्त्वा दिवामन्नमश्नीयुः अक्षारलवणाशिनो भवेयुः अधःशायिनो ब्रह्मचारिणः सर्वभोग
विवर्जिता इति पुत्रादयस्तिलकुशहस्ताः पृथक्पृथक् स्वं स्वं कनिष्ठपूर्वं स्नानार्थं गच्छेयुः ततो जलसमीपं ग
त्वा प्रक्षाल्य चाक्षुकं परिधाय पुनरत्र तूष्णीं प्रेतस्य शांति उदकं तु करिष्यामः स च ल पुरुषो वदेत् शतवर्षा
चेत्स्मृत एवं पाणिद्वयप्रवाल्य एकवस्त्रा प्रावृता यस्मिन् दिने मृतं तस्मिन् क्षीरादकं विहाय सिंचेद
युः अतः तस्मादारभ्य ततो दिनमारभ्य दशरात्रिपर्य्यंतं शिवालये विल्वालये चैत्यास्वत्थमूले गोष्ठे क्रियाकर्म ६

समीपे दीपन्निदध्युः तिलाः प्रदेया पानीयं देयं पौरीयः शिवालये ज्ञातिभिः सह भोक्तव्यमेवमुत्तमषट्कर्म्मं अथ दीपदान
संकल्पः अद्येहामुकगोत्रस्यामुकप्रेतस्य पारलौकिकान्धकारनिवृत्त्यर्थं अद्यावधि दशदिनपर्य्यन्तं एष अखंडदी
पो मद्दत्तस्तवोपतिष्ठतां ततः प्रत्युदीच्यां दक्षिणस्यां दिशि पिंडदानार्थं गच्छेत् ततः जलाशयसमीपे शुद्धभूमिं दक्षि
णपूर्वस्थितां कृत्वा नदीशाने चुल्लीं विधाय गौरमृत्तिकया दक्षिणप्रवणां वेदीं कृत्वा गोमयेनोपलिप्य सर्वांसाम
ग्रीमुपगृह्य स्नानं कुर्य्यात् अथ क्रियाप्रयोगः सव्येन अद्येहेत्यादि अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्वविमुक्तये
उत्तमलोकप्राप्त्ये प्रथमदिनकृत्यार्थं स्नानमहं करिष्ये· उक्तशिखस्नात्वा शिखां बध्वाचम्य अश्मोपरि तिलतोयांजलिं
दद्यात् अपसव्येन· दक्षिणाभिमुखः अद्येह अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्वविमुक्तये उत्तमलोकप्राप्तये चिता
दाहोपजनिततृषोपशमनाय प्रथमदिनसंबंधी प्रथमदिननिमित्ताय एष तिलकुशतोयांजलिर्मद्दत्तस्तवोपतिष्ठतां
तथान्यदिवसे· प्रथमदिनसंबंधि अमुकदिननिमित्ताय एष तिलकुश· एवं प्रकारेण दशदिनपर्य्यन्तं प्रतिदिनमेकै
कमंजलिं वर्द्धयेत् ततः स्नात्वा शुक्लवस्त्रावृतः वेदीसमीपमागत्याचम्य अपसव्येन नवे ताम्रपात्रे प्रसृतिद्वयं शु
क्लतंडुलं संक्षाल्य प्रक्षाल्य चुल्यां श्रापयित्वा दीपं प्रज्वाल्य तिलमधुघृतक्षीरयुतं बिल्वमात्रं सुवृत्तं पिंडं कृत्वा म
ध्याह्ने बलिं कृत्वा संकल्प अद्येह अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्वविमुक्तये उत्तमलोकप्राप्तये प्रथमदि
नसंबंधि प्रथमदिनदिननिमित्ताय प्रथमदिने रौरवनामनरकोत्तारणाय मूर्द्धावयवसंभूत्यै पूरकपिंडप्रदानमहं करिष्ये
इति संकल्प· तूष्णीं वामभागे सव्येन एकशिखं पवित्रं स्थाप्य· तदुपरि कर्मपात्रं पात्रोपरि एकं कुशं पत्रं स्थाप्य जले
नापूर्य्य तिलगंधाक्षतादि निक्षिप्य तस्माज्जलमादाय अपसव्येन एकं कुशासनं दद्यात् अद्येह अमुकगोत्र·

अ१५०

ॐ
प्रे॰मं॰
८

स्य अमुकप्रेतस्य इदं पिंडासनं ते वोपतिष्ठतां अद्येह अमुकगोत्रस्य अमुकप्रेत अवनेजनं ते उपतिष्ठतां पिंडं गृही
त्वा वामजानु निपात्य पिंडोपरि कुशपत्रसतिलं संस्थाप्य अद्येह अमुकगोत्रस्य अमुकप्रेत प्रथमदिने शिरोवनी
मस्तकोत्तारणाय मूर्द्धावयवसंभूत्यै एष पूरकपिंडो मद्दत्तस्ते वोपतिष्ठतां॰ अद्येह अमुकगोत्र अमुकप्रेत प्रत्यव
नेजनं ते वोपतिष्ठतां इदं ते शीतलोदकमुपतिष्ठतु गंधाक्षतम्॰ इमानि भृंगराजपत्राणि ते वोपतिष्ठंतां अयं
ते नैवेद्यं पुंगीफलम्॰ अयं ते धूपः अयं ते दीप उपवस्त्र ऊर्णासूत्रं ते वो॰ मध्वन्नं वलिस्ते वो॰ अद्येह अमुकगोत्र
अमुकप्रेतस्य एतत्ते शीतलोदकगंधाक्षतभृंगराजपत्रधूपदीपऊर्णासूत्रमध्वन्नवलिस्ते वोपतिष्ठतां पिंडदक्षि
णा पूर्ववत्संकल्प॰ तिलतोयपात्रं दर्भयुतं गृहीत्वा पिंडोपरि दद्यात् अद्येह अमुकगोत्रस्य अमुकप्रेतस्य पि
पासाहजनिततृषोपशमनाय प्रथमदिनसंबंधि प्रथमादिननिमित्ताय इदं तिलकुशतोयपात्रं मद्दत्तं ते वोपतिष्ठतां तिलतोय
पात्राणि तिलांजलिवत् दशदिनपर्यंतं वृद्धिः एवं पंचपंचाशत् ५५ भवंति इति तिलतोयपात्रं दत्वा॰ कर्मपात्रं उत्था
य सव्येनाचम्य अनादिनिधनो देवः शंखचक्रगदाधरः अक्षय्यपुंडरीकाक्ष प्रेतमोक्षप्रदो भव इत्युच्चार्य करसंपु
टं कृत्वा सतिलोदकं पिंडादिकं प्रेताय तस्मै नमस्तु अच्युताय नमः पिंडादिकं सर्वं भूमौ निक्षिपेत् ततः आकाशे स्थितम् अपसव्येन ५
ण्मये पात्रे दंतधावनसहितं क्षीरोदकं दद्यात् मंत्र चितानलप्रदग्धोसि परित्यक्तोसि बांधवैः इदं नीरमिदं क्षीरमत्र
स्नाहि इदं पिब १ प्रयाति यावदाकाशे पिंडवाष्पसमयी शिखा तावत्तस्मुखपश्य दिनतोयं तु नाक्षिपेत् इति क्षिप्त्वा द
दुने दंतधावनमुपतिष्ठतु इति प्रथमदिने कृत्यं अंजलिः प्रथमं दद्यात्कालज्ञानं तथासनं तथावनेजनं चैव पिंडस्था
नवपूरक नामगोत्रसमुच्चार्य पुनः प्रत्यवनेजनं दद्यात्तोयं तथा गंधपुष्पधूपदीपकं ऊर्णासूत्रं वलिं च यत्नतः ७
दाहदिनात् आरभ्य दशाहिक पर्यंतं प्रतिदिनं प्रेतपिंडं शरीरं संपूर्णं दत्वा तथापि गते ... पिंडान्दद्यात् जननाद्
पं क्षीरं च मृण्मये गृहद्वारे समाप्ते या तीर्थे देवालये पिवा पत्राद्ये दिपेतो पिंडं तत्र सर्वं समाचरेत् इति धर्मप्रबोधेन्दौ

अग्राणि चेवारि चतुर्दशांगसंभूतं प्रेतपिंडं दशाह्निकं इति सूत्रं तत्र स्नात्वा शुद्धवस्त्राहृतः गृहीतवैणवंदंडः शनैः गृहमागत्य
कृत्य एकभक्ताशनं हविष्यासनं कुर्यात् दशदिनेष्वपि अयमेव विधिः कार्यः गृहमागत्य क्रीतलब्धं चान्नं अस्पृष्टं
लवणान्नादिभिः सह दिवा अश्नीयात् भोजनसमये सघृतं ग्रासं अन्नं गृहीत्वा अमुकगोत्राय अमुकप्रेताय इदमन्नमुप
पतिष्ठतां इति संकल्प्य सजलं दद्यात् एवं क्रमेण द्वितीयदिने कुर्यात् दशदिनपर्यंतं सर्वं प्रथमदिनवत्तनरकावयव
नामविशेषमात्रं संकल्प्यः अद्येह द्वितीयदिने यानिपुंसवनामनरकोत्तारणाय चक्षुश्रोत्रनासानिष्पत्त्यर्थं पूरक
पिंडप्रदानमहं २ अद्येह तृतीयदिने हाहारौरवनामनरकोत्तारणाय भुजवक्षोग्रीवामुखावयवनिष्पत्त्यर्थं पूरक
पिंडप्रदानमहं करिष्ये ३ अद्येह चतुर्थदिने तामिस्रनामनरकोत्तारणाय उदरनाभिवस्तिलिंगगुदामेढ्रावयवनिष्प
त्यर्थं पूरपिंडप्रदानमहं ४ अद्येह पंचमदिने अंधतामिस्रनामनरकोत्तारणाय स्फिगूरुजानुजंघाचरणावयव
निष्पत्त्यर्थं पूरकापिंप्र० ५ अद्येह षष्ठमदिने संभ्रमनामनरकोत्तारणाय निखिलांगप्रत्यंगमर्मावयवनिष्पत्त्य
र्थं पूरकपिंडप्रदानमहं ६ अद्येह सप्तमदिने अमेध्यकृमिनामनरकोत्तारणाय अस्थिमज्जाशिरावयवनिष्पत्त्य
र्थं पूरकपिंडप्रदानमहं ७ अद्येह अष्टमदिने पुरीषभक्षणनामनरकोत्तारणाय नखरोमावयवनिष्पत्त्यर्थं पू
रकपिंडप्रदानमहं क० ८ अद्येह नवमदिने स्वमांसभक्षणनामनरकोत्तारणाय बलवीर्यमर्मादिसर्वावयवनि
ष्पत्त्यर्थं पूरकपिंडप्र० ९ अद्येह दशमदिने कुंभीपाकनामनरकोत्तारणाय क्षुत्तृष्णापिपासोनिशांत्यवयवनिष्पत्त्यर्थं
पूरकपिंडप्रदानमहं करि० १० इति क्रमेण दशदिनकृत्यं विधाय दशमदिने वस्त्रादि प्रक्षालनार्थं रजकगृहे दत्वा
अवशिष्टानि दशमदिने क्षालयेत् दशमदिने गृहलेपनपूर्वं ताम्रभाजनादि संशोध्य मृन्मयभांडानि त्यक्त्वा

दीपं ज्ञात्वा शेयं निक्षिप्यः दंडं च निक्षिप्य॰ पिंडदानादि कृत्वा प्रथमदिने चुली वेदीं कुंभं च संभेद्य आकाशे पयो
दानं अद्येह अमुकगोत्राय अमुकप्रेताय इदं पय उपतिष्ठतां इति दत्वा॰ अथान्यकृत्य दशदिनपर्यंतं॰
अपक्वे मृन्मये पात्रे नीरं क्षीरं माल्यादि दिये सायंकाले प्रतिदिनं काष्ठत्रयं बध्वा चतुष्पथे वा अश्वत्थमूले
धर्मघटसमीपे दत्वा अपसव्येन तिलकुशहस्ते गृहीत्वा संकल्पः अद्येहामुकगोत्रस्यामुकप्रेतस्य सायंका
ले अपक्वमृन्मये पात्रे इदं नीरं मद्दत्तं स्नवोपतिष्ठतां १ अद्येहामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये सा
यंकाले अपक्वे पलाशपत्रे इदं क्षीरं मद्द॰ २ अद्येहामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये सायंकाले॰ इ
दं माल्यादि मद्दत्तं॰ ३ अद्येह अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये॰ सायंकाले इदं दीपं मद्दत्तं॰ ४
अन्नादि सर्वेषां नाम्ना पदं त एवं क्रमेण शांतिदिनं कृत्वा अथ नवकश्राद्धं॰ दशदिनमध्ये॰ प्रथमेह्नि तृती
ये वा पंचमे सप्तमे तथा नवमैकादशे चैव तन्नवश्राद्धमुच्यते॰ १ इत्युक्ते यथाविधि नवश्राद्धं कृत्वा॰ अथ न
वकश्राद्धं लिख्यते सव्यं कृत्वा ॐ अपवित्रः पवित्रो पठेत मंत्रः देवकीनंदनं कृष्णं द्विभुजं पीतवाससं आ
रभे कुंभंराणां श्राद्ध पुंडरीकाक्षं स्मरेद्धरिम १ अद्येह अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये अभिष्टलोका
वाप्त्य प्रथमदिनसंबंधि नवकश्राद्धे इदं मासनं तत्वोपतिष्ठताम् १ अर्घं सपवित्रं वामहस्ते कृत्वा पवित्रं भो मद्दत्त
जनपात्रे धृत्वा तदुपरि किंचिदुदकान्तरं दत्वा अर्घं दक्षिणहस्ते संकल्पं कृत्वा अद्येह अमुकगोत्रस्यामुकप्रे
तस्य प्रेतत्वविमुक्तये अभिष्टलोकावाप्त्य प्रथमदिनसंबंधि नवकश्राद्धे एष हस्तार्घो मद्दत्तं स्तवोपतिष्ठतां अ
र्घं पुनः प्रत्यर्घं पुनः प्रत्यर्घं भस्तु अर्घं न्युब्जं कुर्यात् पुनः गंधादिदानसंकल्पं अद्येह अमुकगो

त्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये ऽभिष्टलोकावाप्त्यै प्रथमदिन संबंधी नवक श्राद्धे एतानि गंधादीनि मद्दत्तानि तवो
पतिष्ठंतां चतुष्कोणमंडलं अन्नसजलपरिवेषणं संकल्प अद्येह अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्व विमुक्तये
ऽभिष्टलोकावाप्त्यै प्रथमदिन संबंधी नवकश्राद्धे इदं अन्नोदकं मद्दत्तं तवोपतिष्ठतां वेदिकां कृत्वा जलेन प्रोक्ष्य अ
ग्रहस्तो निरेखाकरणं तान् कुशान् ईशान्यां दिशि क्षिपेत् पुनः कुशासनं संकल्प अद्येहामुकगोत्रस्यामुकप्रेतस्य
प्रेतत्वविमुक्तये ऽभिष्टलोकावाप्त्यै प्रथमदिन संबंधी नवकश्राद्धे पिंडस्थाने कुशासनं मद्दत्तं तवोपतिष्ठतां अवने
नेजनं संकल्पः अद्येह अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये ऽभिष्टलोकावाप्त्यै प्रथमः दिन संबंधि नवक
श्राद्धे पिंडस्थाने कुशोपरि अवनेजनं मद्दत्तं तवोपतिष्ठतां पिंडदद्यात् संकल्पः अद्येहामुकगोत्रस्यामुकप्रे
तस्य प्रेतत्वविमुक्तये ऽभिष्टलोकावाप्त्यै प्रथमदिन नवकश्राद्धे एषः पिंडो मद्दत्तस्तवोपतिष्ठताम् पुनः प्रत्यव
नेजनं अद्येहामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये ऽभिष्टलोकावाप्त्यै प्रथमदिन संबंधी नवकश्राद्धे पिंडोप
रि प्रत्यवनेजनं मद्दत्तं तवोपतिष्ठतां पुनः गंधादिदानं अद्येह अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये ऽभिष्ट
लोकावाप्त्यै प्रथमदिन संबंधि नवकश्राद्धे एतानि गंधादीनि मया दीयन्ते तव अक्षय्योदकं अद्येह अ
मुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये ऽभिष्टलोकावाप्त्यै प्रथमदिन संबंधि नवकश्राद्धे इदमन्नं अक्षय्योदकं
मद्दत्तं तवोपतिष्ठतां सव्यं दक्षिणा अद्येह अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये ऽभिष्टलोकावा
प्त्यै प्रथमदिन संबंधि नवकश्राद्धे पिंडप्रतिष्ठार्थं ताम्रं अग्निदैवतं अमुकगोत्रायामुकगोत्रायामुकशर्मणे ब्राह्म
णाय ददे अपसव्य अच्छिन्नजलधारां दद्यात् संकल्पः अद्येहामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त

ॐ
प्रे.मं.
८

योऽभीष्टलोकावाप्त्यै प्रथमदिनसंबंधि नवकश्राद्धं अद्भिर्नु जलधारायं मद्दत्तस्तवोपतिष्ठतां सर्वं प्रमादात्कु
र्वतां कर्म प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः १ अनादिनिधनो देव शंखचक्रग
दाधर अक्षय्यः पुंडरीकाक्ष प्रेतमोक्षप्रदो भव २ अपसव्यं अभिगम्यतामिति विसर्जनं एवं षट्श्रुतिपि
ण्डे कुर्यात् सव्येनाचम्य इति नवकश्राद्धसमाप्तम् संपूर्णम् ॥ ततः पाथेयश्राद्धं यथा पाकं वटकान्नं संक
ल्पं कृत्वा संकल्प्य अद्येहामुकगोत्राय अमुकप्रेताय पाथेयश्राद्धं इदं वटकान्नसहितं मत्ततवोपतिष्ठतां
अपसव्येन इति मार्गमध्ये दत्त्वा तत्र स्नात्वा सव्येनाचम्य ततः उत्तरे जलाशये गत्वा सर्वे बांधवाः यथा देशाचार
नखरोमछेदनाभ्यां मलापकर्षणं स्नानं कृत्वा वासांसि परिधाय मंगलद्रव्याणि स्पृशेत् दधि दूर्वा गोरोचन
हरिद्रा गोमयाक्षत मृत्तिका शर्षप चंदन ब्राह्मण पादगाव एतानि मंगलद्रव्याणि स्पृष्ट्वा पंचगव्यं प्राश्य गृह
गत्वा बांधवैः सह भुंजीत ॥ इति दशदिनकृत्यविधिः ॥ तत्र वचनम् विप्रः शुद्ध्यत्यपः स्पृष्ट्वा क्षत्रियो वाह
नायुधं वैश्यः प्रतोदरश्मीन्वा शूद्रो यष्टिं कृतक्रियाः ब्राह्मणो दशरात्रेण द्वादशाहेन भूमिपः वैश्यः पंचदशा
हेन शूद्रो मासेन शुध्यति अत्र प्रसंगादस्थिक्षेपविधिः अस्थीनि मातृपितृवंशजानां नयति गंगामपि यो न
कदाचित् सदृशजस्यापि दयाभियुक्तास्तस्य च तीर्थानि फलप्रदानि इति फलमाकलय्य दशमदिनमध्ये
अस्थिक्षेपस्य गंगामरणफलमवलोक्य भक्तिमान्पुत्रोऽस्थिक्षेपं गंगाभूमौ कुर्यात् अस्थिक्षेपे गंगां
गत्वा पंचगव्येनास्थीनि सिक्त्वा तिलमध्वाज्यमिश्रितानि कृत्वा सुवर्णमृत्पिंडेमादाय दक्षिणस्यां दि
शि पश्यन् नमोऽस्तु धर्माय इति वदन् गंगाम्भसि प्रविश्य स मे प्रीतो भवतु इति क्षिप्य उत्थाय सूर्यं अवेक्ष्य विप्रा राम

यद्दक्षिणां दद्यात् एवं कृत्वा प्रेतस्य स्वर्गे इंद्रतुल्या गतिर्भवति॥ उक्तं च यावंत्यस्थि मनुष्याणां गंगांतो
येषु तिष्ठंति तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥ शय्यायाः संक्षेपविधिः अथैकादशाहकृत्यं
उत्तरकृच्छ्राकार्यं सव्येन प्रथमं दंपती पूज्यौ शय्या देया ततः परं पश्चाच्च कपिला देया एकत्र भुक्ते येव च वृषो-
त्सर्गस्ततः कार्यः पश्चादेकादशाहिकं॥ प्रथमं कर्त्ता स्वयं स्नात्वा दंपती पूजनादिद्रव्याण्यासीने कर्मसाध्यपु-
शन देवतीर्थे सव्येन प्राङ्मुखो दङ्मुखो वा कुर्यात् अद्येह त्यादि देशकालौ स्मृत्वा अमुकगोत्रस्य अमुकप्रे-
तस्य प्रेतत्वविमुक्तये उत्तमलोकप्राप्त्यर्थं मृतशय्याकांचनपुरुषप्रतिग्रहार्थं द्विजदंपत्योः पूजनं महं क-
रिष्ये॥ इति संकल्प्य॥ एतन्ते देव सवितुर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे तेन यज्ञमव तेन यज्ञपतिं तेन मामव
मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञं समिमं दधातु विश्वेदेवास इह मादयंता-
म् ओं भूर्भुवः स्वः द्विजदंपती सुप्रतिष्ठितौ भवेतां द्विजदंपतीभ्यां नमः॥ इति मंत्रेण पाद्यार्घ्यस्नानगंधाक्षतपुष्प
धूपदीपवस्त्रालंकरणैः संपूज्य संकल्पः अद्येह अमुकगोत्रस्य अमुकप्रेतस्य सकलनरकादिदुः-
खोद्धरणपूर्वक अक्षयस्वर्गलोकप्राप्तिकामनया इमानि गंधादीनि यथाशक्त्युपकल्पितानि द्विजदंपतीभ्यां
संप्रददे॥ अनेन द्विजदंपतीपूजाप्रतिष्ठासिद्ध्यर्थं इदं सुवर्णं रौप्यं वा अग्निदैवतं ब्राह्मणाय संप्रददे अथ मृत-
शय्याकांचनपुरुषदानं अद्येह अमुकगोत्रस्यामुकप्रेतस्य पुराणोक्तफलप्राप्त्यर्थं मृतशय्यायां प्रे-
तोपकल्पित कांचनपुरुषस्य पूजनमहं करिष्ये इति संकल्प्य॥ एतन्ते इति कांचनपुरुष इहागच्छ इह तिष्ठ॥

श्रीः
प्र.मं.
१०

कांचनपुरुषायनमः इतिमंत्रेण पाद्यादिभिः संपूज्य प्रेतोपभुक्तशय्यां सोपस्करां फलवस्त्रसहितां कृ
त्वा संकल्पः अद्येह अमुकगोत्रस्यामुकप्रेतस्य पुराणोक्तफलप्राप्त्यर्थं इमां पूर्वोपभुक्तशय्यां फलव
स्त्रयुतां कांचनपुरुषप्रतिमासहितां युवाभ्यां संप्रददे तन्मम कृतेन मृतशय्याकांचनपुरुषस्य दानप्रतिष्ठ
सिद्ध्यर्थं इदं सुवर्णं युवाभ्यां दास्ये इतिसंकल्प्य द्विजदंपती प्रति पतिं कुर्यात् अथ लक्ष्मीनारायणशय्या
दानं ततो यथोपस्करणवतीं शय्यां दक्षिणोत्तरायतां परिस्तीर्य शिरःप्रदेशे घृतकुंभं पादप्रदेशे ज्वलंतीं चतु
र्वर्तिकां खट्वाधः कर्पूरादिवासितजलपूर्णनिद्राकलशं निधाय पार्श्वयोरन्यानि उपस्करणानि समधा
न्यानि च निधाय शय्योपरि पंचामृतस्नापितां श्रीलक्ष्मीनारायणप्रतिमां निधाय एनेतेति प्रतिष्ठाप्य पू
जासंकल्पः अद्येह अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्वनिवृत्तिपूर्वक अक्षयस्वर्गप्राप्त्यर्थं शय्यादानपूर्वांग
त्वेन शय्योपरि श्रीलक्ष्मीनारायणदेवस्य पूजनमहं करिष्ये ध्यानम् दक्षिणाधः करे पद्मं शंखमूर्ध्वे करे न्यसे
त् वामोर्ध्वे च भवेच्चक्रं लक्ष्मीपृष्ठे करः परः १ वामोत्संगगता लक्ष्मी रत्नपात्रकराभवेत् पद्मासनगता कु
र्यात् देवदेवं चतुर्भुजं दक्षिणस्य भुजो देव्याः पृष्ठे देवस्य चक्रिणः इतिध्यात्वा ॐ लक्ष्मीनारायणाय नमः
इतिमंत्रेण पाद्यादिनीराजनांतं संपूज्य अथ शय्यां संकल्प्य तिलकुशयवादि स्वहस्ते गृहीत्वा अद्य
इत्यादि अमुकगोत्रस्य अमुकप्रेतस्य सकलपातकनाशपूर्वकशांतवाधायाम्यपुरुषप्रतिस्वरनिहतिपूर्वकब्रह्मा
कल्पं पुरंदरादिसकललोकोत्तमलोकप्राप्तिकामनया इमां शय्यां निद्राकलशघृतकुंभज्वलत्कुंभचतु
र्वर्तिकाछत्रचामरासनपादुकोपानहवाहनायुधपाकभोजनपात्रविविधभक्ष्यभोज्यलक्ष्यचाष्या रामः

पधाना दर्श कर्पूरादिगंधपट्टकौशेयकार्पासवस्त्रसुवर्णरजतभूषणताम्बूलादि यथाशक्ति द्रव्यसहितां स्त्रीपत्नं·
केकतिकाकेशसूत्रकाचकंकणसिंदूरादिसौभाग्यद्रव्ययुतां प्रजापतिदैवत्यां श्रीलक्ष्मीनारायणप्रतिमासहितां यु
वाभ्यां संप्रददे ह्रनेन च शय्यादानकर्मणः सांगतार्थं इदं सुवर्णं युवाभ्यां दास्ये· दानवाक्यं यथा न कृष्णशयनं
शून्यं सागरजातया तथा शय्या ममाप्यशून्यास्तु तव जन्मनि जन्मनि १ क्षणमात्रं मुहूर्त्तं शय्यायां ब्राह्मणं विश्राम्य स
विपत्नं समापयेत् यस्य स्मृत्येति पठित्वा ॐ अच्युताय नमः इति लक्ष्मीनारायणशय्यादानं ॥ अथ कपि
लादानं कपिलां गां सुरत्नस्थाप्य· संकल्पः अद्येह अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्वविमुक्तये उत्तमलोकप्राप्त्य
र्थं कपिलादानमहं करिष्ये· ब्राह्मणं संपूज्य वरणं कृत्वा· एभिर्गंधाक्षतपुष्पमाल्यवासोभिर्गोदानप्रतिग्रहार्थं त्वा
महं वृणे· इति वृत्वा· गां पूजयेत् गोः अग्रपादाभ्यां नमः गोः पश्चात्पादाभ्यां नमः गोः शृंगाय नमः गोः स्कंधा
य नमः गोः पृष्ठाय नमः इति गंधाक्षतैः गां संपूज्य वस्त्रं आच्छादनं तथा दद्यात् सम्यक् शुद्धं सुनिर्मलं सुर·